International Journal of Applied Research 2019; SP7: 85-86



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2019; SP7: 85-86

**डा० राजकुमार**
शोधार्थी, संस्कृत विभाग,
ल०ना०मि०वि०वि०, दरभंगा, बिहार
भारत.

**Correspondence**
**डा० राजकुमार**
शोधार्थी, संस्कृत विभाग,
ल०ना०मि०वि०वि०, दरभंगा, बिहार
भारत.

**(Special Issue-7)**
**"International Conference on Science and Education: Problems, Solutions and Perspectives"**
**(3rd June, 2019)**

# स्वरगुणविवेचनम्

## डा० राजकुमार

**प्रस्तावनाः**
प्रातिशाख्यप्रभृतिषु ग्रन्थेषु इमे गुणा अपि स्वरः, मात्रा, स्थानकरणे बलम्, अनुप्रदानं चेति संज्ञाभिः पंचधा कथिताः। ते चेह निरू पिता प्राक्।
वर्णसमीक्षायां च स्वरगुणः, विशेषेण विचारितः। तत्र तावत् स नवधा प्रोक्तः श्वासलक्षणः, नादलक्षणः, विवारलक्षणः, स्थानलक्षणः, व्यक्तिलक्षणः, गेह्मलक्षणः, श्रुतिलक्षणः, सवनलक्षणः, भागलक्षणश्चेति।
प्रथमं श्वासलक्षणस्वरस्तत्रेत्थं व्याख्यातः, अयं विश्वकर्मा प्राणो द्विधा, बहिः प्राणः सूर्यो नाम, अन्तः प्राणः स्वरो नाम। तत्रामुष्माद् बहिःप्राणात् सूर्याख्यात् सर्वजगद्व्यापी कश्चिद् वाङ्मयो महासमुद्रः प्रवर्तते सरस्वान् नाम। अयमेव अन्तरिक्षरूपः समुद्रो निरुक्ते व्याख्यातः, स इन्द्रेष्वेक, अथैतस्मादन्तः प्राणात् स्वराख्यात् सर्वशरीरव्यापिनी काचिद् वाङ्मयी महानदी प्रवर्तते सरस्वती नाम। सा च तेजोमथी वागेन्द्रीति वेदे श्रूयते तव्याख्यास्यतेऽनुपदमग्रे। इत्थं चात्र बहिः प्राणात्मकोऽयं सूर्यो जगदात्मा, अन्तः प्राणात्मकः स्वरश्च प्रतिशरीरमात्मेति सिध्यति। तत्र प्राणात्मकः स्वरः नासिकास्थानाभ्यां निश्वासप्रश्वासाभ्यां लक्ष्यत इत्यतः श्वासलक्षणोऽप्युच्यते। तत्र स्वर एव श्वास इति न भ्रमितव्यम्; मूलाधारादारभ्य ब्रह्मरन्ध्रपर्यन्तं मेरुदण्ड– सलग्नस्तदुत्तरतस्तदक्षिणतो वा संसज्यानवरतं एवोर्ध्वमधस्ताद् वा क्रममाणः शारीरं वायु बहिर्निःसारयति, बाह्यं च विशुद्धमन्तः संचारयति, स निश्वासः प्रश्वासो वा भवति, यद् व्यापारानुरोधेन च तत्र वायुव्यापारो जायते स प्राणः स स्वर इति विवेचनात्।
प्राणो द्विधेति स्वरसूर्ययोनित्यसम्बन्ध इति बुद्ध्या श्रावति श्रुतिरपि 'तावेतावन्योन्यस्मिन् प्रतिष्ठितौ, रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः प्राणैरयममुष्मिन्, तस्योपनिषद् अहम' इति। तावित्यनेन स्वरसूर्ययोरेवात्र ग्रहणं भवति, ततश्च द्वैविध्यं तस्य जातमेव।
किंचेदमपि ज्ञायते यद् बहिर्दृश्यं सर्व बहिःप्राणजन्यम्, निमित्तवशाच्च तत्र नानात्वमिवाभाति। एवमन्तर्वर्तमानं च निखिलम् अन्तःप्राणजन्यम् तत्राप्यनेकत्वानुभवः, निमित्तविशेषसंयोगादेवेति वस्तुजातं विश्वकर्मप्राणमूलकमेव सिध्यतीति श्वासलक्षण– स्वरविचारे जगदुत्पत्तिप्रकारश्च प्रकारान्तरेण समायातः। अस्तु, स्त्ररेणामुना कालज्ञानं शुभाशुभफलादिकं च विचार्यत इत्यन्यत्र विस्तरः।

नादविवारलक्षणस्वराविह प्रयत्नविशेषावेव व्याख्यातौ, स्थानलक्षणस्वरूप– निर्धारणे वर्णोत्पत्तौ त्रीणि स्थानानि कल्पितानि, तत्र उरोजिह्वामूलकण्ठनासाः प्रथमम्, तालुमूर्द्धदन्तनासा मध्यमम्, सृक्कोपध्मौष्ठनासा उत्तमम्। अतस्तेषां मते अ इ उ इत्येते त्रयः स्वराः प्रथममध्यमोत्तमस्थानाः क्रमेणोदात्तानुदात्तस्वरिता भवन्ति। तथा च अक इत्युदात्तः, इकि इत्यनुदात्तः, उकु इति स्वरितः, दीर्घप्लुताश्च नातिरिच्यन्ते, एतेष्वेव तदन्तभावात्।

**तस्मात् त्रय एव स्वराः सिद्धा इति स्थानलक्षणस्वरः कथितः।** [1]
अथ व्यक्तिलक्षणस्वरः प्रक्रमते, अयं हि स्वरो व्यक्तिभेदाद् भिद्यते इदमाह्वानं देवदत्तस्य, इदं च यज्ञदत्तस्येति ज्ञानमनेनैव स्वरेण जायते; यतः प्रतिव्यक्ति यथागमनादिकं भिन्न भिन्नं भवतीति प्रकृतिसिद्धं तथैवोच्चारणमपि। ततश्च स्वरभेदे व्यक्तिलक्षणस्वरः कल्पनीयः। तत्र महाप्राणाल्पप्राणप्रयोगाच्चोदात्तानुदात्तस्वरितानां व्यवस्थापि जायते। जनाश्च केचिदुदात्तभाषिणः केचिच्चानुदात्तभाषिणः, अपि चान्ये बहवः स्वरितभाषिणो दृश्यन्ते। तत्रापि व्यक्ति विशेषस्वर एवेति व्यक्तिलक्षणस्वरः सिद्धः।

गानपदबोध्यः सामिको हिं गेह्मलक्षणस्वरो ज्ञायतेय यतः

**"आर्चिकं गाथिकं चौव सामिकं चेतिस्वरान्तरम्"** [2]

इत्यत्र त्रिविधः स्वरः ख्यातः, तत्र पद्यप्रपाठकाः आर्चिकं स्वरमङ्गी–कुर्वन्ति। स च स्वरितस्वर एव। नच तत्रात्युच्चौर्नैवातिनीचौरुच्यते किन्तु मध्यममार्गेणोद्यते। अन्यथा ते पाठका हस्यन्ते इति। गद्यपाठकास्तु संभाष्यव्यक्तिश्रवणमात्रोद्देशेन नीचैरेवस्वरैः शब्दमुच्चारयन्ति, ततश्चानुदात्तः स गाथिको नाम स्वरः स्पष्टः।

गायकाश्च पुनः सामिकं स्वरमवलम्बन्ते, सच स्वभावत उच्चैः शब्दोज्ञारणविषयस्ततश्चोदात्तोऽपि, तथा च त्रिषु स्वरेषु सिद्धेषु यः सामिकस्वरः स एव प्रकृते गेहलङ्गणस्वर इत्याख्यायते। वेदेषूपलभ्यमाना ऋग्गाथा सामेत्येते त्रयः शब्दा अपि क्रमेण पद्यगद्यगेयार्था एवेति गह्मलक्षणस्वरः सिद्धः।

श्रुतिलक्षणस्वरः खलु संगीते प्रसिद्धः। "मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्" इत्युपदर्शितदिशा शरीराग्निना क्षुभ्यमाणो वायुरूवं गच्छन् नादो भूत्वा तत्तत्स्थानमुपलभ्य श्रुतिसंज्ञं ध्वनि जनयति। ततश्च सप्त शुद्धाः, विकृताश्च द्वादश स्वरा जायन्ते। तदुक्तम'

**शारीरं नादसंभूतिः स्थानानि श्रुतयस्तथा।** [3]

ततः शुद्धाः स्वराः सप्त विकृता द्वादशाप्यमी, इति। तत्र षड्जः, ऋषभः, गान्धारः, मध्यमः, पंचमः, धैवतः, निषादश्चेति सप्त स्वरा विशिष्टैरेव गायकैः श्राव्यन्ते। अपि चौतेषां स्वरूपज्ञानं पशुपक्षिणां रवज्ञानोज्जायते। पशवः पक्षिणश्च बहवः तत्तत्स्वरानुरूपमेव रुवन्ति। तथा च भूयते :–

**षड्जं रौति मयूरो हि गावो रम्भति चर्षभम्।**
**अजा विरौति गान्धारं क्रौंचो नदति मध्यमम्।।**
**पुष्पसाधारणो काले कोकिलो रौति पंचमन्।**
**अश्वस्तु धैवतं रौति निषादं रौति कुंजरः।।** [4]

इत्यलमप्रकृतपल्लवितेन। विशेष जिज्ञासुभिः तत्संगीतशास्त्रतोऽवगन्तव्यम्। एतच्छ्रुतिस्वरूपम् "रणद्भिराघट्टनया नभस्वतः, पृथग विभिन्नतिमण्ड– लस्वरैः" इतिमहाकविमाघपद्यव्याख्यायां व्याख्यातं मल्लिनाथेनापि। तत्र श्रुतिर्नाम स्वरारम्भावयवशब्दविशेष इत्युक्तवा प्रमाणे–

**प्रथमश्रवणाच्छब्दः श्रयते ह्रस्वमात्रकः।**
**सा श्रुतिः संपरिज्ञेया स्वरावयवलक्षणा।।** [5] **इति।**

वचनमुदाहृतम्।
तथा च पूर्वोक्तश्रुतिलक्षण एवैतस्यापि तात्पर्य सुस्पष्टम्।
अत एव च–
**श्रुत्यन्तरभावीयः स्निग्धोऽनुरणनात्मकः।**
**स्वनो रंजयति श्रोतुश्चित्तं स स्वर उच्यते।।** [6]
इति तत्रस्थरत्नाकरव चनात् श्रुत्यारब्धमनुरणनं स्वर इति स्वरलक्षणमपि संगच्छते।
तदित्थं संक्षेपेण श्रुतिलक्षणस्वरो निरूपितः। अवशिष्टावत्र च सवनभागलक्षणस्वरौ प्रागेव विशदीकृताविति ततोऽवधेयम्।
एवं वागगुणेषु स्वरगुणो नवधा विवेचितः, अन्ये च गुणाः प्राग् व्याख्याता एवेति।

## संदर्भ सूची :


1. वाक्यपदीयम्, चौखम्भा प्रकाशन, दिल्ली, 2007.
2. ऋक्प्रतिशाख्य, गीताप्रेस, गोरखपुर, 2005.
3. पाणिनीयशीक्षा, भूमिका, चौखम्भा प्रकाशन, दिल्ली, 2001.
4. याज्ञवलक्यशिक्षा, भूमिका, मोतीलाल बनारसी दास, 2007.
5. शिशुपालवध, मल्लिनाथ टीका, चौखम्भा प्रकाशन, वाराणसी, 2007.
6. संस्कृत भाषा विज्ञान, विश्वविद्यालय प्रकाशन, वाराणसी, 2009.